International Journal of Sanskrit Research 2021; 7(2): 39-41

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(2): 39-41
© 2021 IJSR
www.anantaajournal.com
Received: 08-01-2021
Accepted: 10-02-2021

**डॉ. महेश कुमार शर्मा**
व्याख्याता, रा. शा. संस्कृत महाविद्यालय, महापुरा, जयपुर, राजस्थान, भारत

**Corresponding Author:**
**डॉ. महेश कुमार शर्मा**
व्याख्याता, रा. शा. संस्कृत महाविद्यालय, महापुरा, जयपुर, राजस्थान, भारत

# भूषणसारपरमलघुमञ्जूषयोः लकारार्थसमीक्षा

**डॉ. महेश कुमार शर्मा**

### प्रस्तावना
वेदार्थावबोधाय तत्स्वराद्यवगमायतद्विनियोगज्ञानाय च केषाञ्चित् च सहायकग्रन्थानां महत्यावश्यकता आसीत्। एतदभावपूर्तये एव जनिः अभवद् वेदाङ्गानाम्।

### षडिमानि वेदाङ्गानि

"शिक्षाकल्पो व्याकरणं निरूक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु"[1]।।

षण्णामेतेषां महत्त्वं निरीक्ष्यैव प्रतिपाद्य ते पाणिनीयशिक्षायां 'मुखं व्याकरणं स्मृतम"[2] इति। 'मुखं व्याकरणं समृतम' इत्युक्त्या वेदाङ्गेषु व्याकरणं प्रधानं वर्तते।[3] व्याकरणे प्रकृतिप्रत्यययोः विचारः, उदात्तादिस्वर विचारः उदात्तादिस्वर सञ्चार नियमाः, सन्धिनियमाः, शब्दरूपधातुरूपादिनिर्माणनियमाः, प्रकृतेः प्रत्ययस्य च स्वरूपावधारणं, तदर्थनिर्धारणञ्चेति विविधा विषया विविच्यन्ते। संस्कृत व्याकरणं प्रतिशाख्यमूलकमेव। वेदानां प्रतिशाखमाश्रित्य व्याकरणग्रन्था आसन्, ते च 'प्रातिशाख्यग्रन्थाः इति नाम्नाभिधीयन्ते स्म। संस्कृत व्याकरणावबोधाय च पाणिनेः अष्टाध्यायी सर्वप्रमुखा।
अन्ये प्राचीना व्याकरणग्रन्था लुप्तप्राया एव भाषायाः सम्यक स्वरूपज्ञानाय व्याकरणस्य प्रवृत्तिः अवलोक्यते। व्याकरणं विना भाषायाः ज्ञानं न भवितुमर्हति। भाषया एव लोकव्यवहारं चलति यदि भाषा न स्यात् तदा सम्पूर्णमिदं जगत् अन्धे तमसि निमज्जेत इति दण्डिना'[4] कथितम्। व्याकरणेनैव भाषा शुद्धत्तां प्राप्नोति पाणिनीये व्याकरणे शब्दानां वैज्ञानिकं विवेचनं जातं, प्रकृति–प्रत्यययोः स्वरूपं सम्यक् प्रकटितम्। व्याकरणं विना शब्दानां तत्त्वावबोधः कर्तुमपि अशक्यः। शब्दसाधुत्वद्वारा व्याकरणं निखिलशास्त्रोपयोगि इत्युच्यते। अत एव –
'काणादं पाणिनीयं च सर्वशास्त्रोपकारकम' इति प्रसिद्धम् एवञ्च संस्कृतवाङ्मयेषु व्याकरणस्य अतिमहत्त्वं विद्यते। कात्यायनेनापि "रक्षोहागमलघ्वसन्देहाः प्रयोजनम"[5] इत्यनेन वाक्येन व्याकरणस्य महत्त्वमेव प्रतिपादितम्।
भारतवर्षे व्याकरणस्य परम्परा प्राचीनतमा अस्ति। तत्र व्याकरणशास्त्रे वाक्यपदीयाभिधो दार्शनिको ग्रन्थो वाक्यार्थनिर्णायकत्वेन व्यरचि श्रीभर्तृहरिणा। तदनु श्रीभट्टोजिदीक्षितनिर्मितां कारिकावलीमुपजीव्य विद्वद्वरेण श्रीकौण्डभट्टेन 'भूषणसार' नामिका व्याख्या व्यधायि। तत्रापि वाक्यार्थनिर्णायककारणेषु वैमत्यमपूर्णत्वादिकञ् चालोच्य शाब्दिकचक्रचूडामणिना श्रीनागेश भट्टेन परमलघुमञ्जूषा नामग्रन्थः निरमायि। एतद्ग्रन्थद्वयमाधारीकृत्यैव "भूषणसारपरमलघुमञ्जूषयोः लकारार्थसमीक्षा" इति विषयमवलम्ब्य शोधपत्रमिदं प्रस्तूयते मया।

### प्रस्तुतीकरणम्
पदञ्च द्विविधम्–सुबन्तं तिङन्तञ्चेति। तत्र तिङन्तपदस्यान्वाख्यानाय महर्षिणा पाणिनिना लकारविधानमारब्धम्– "लः कर्मणि च भावे चाकर्मकेभ्यः"[6] इति।
'सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र' इति नियमात् अस्मिन्नपि सूत्रे चकारग्रहणात् "कर्तरि कृत"[7] इति सूत्रात् कर्तरीति पदमनुवर्तते एवञ्च सकर्मकेभ्यो धातुभ्यो लकाराः कर्मणि कर्तरि च, अकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि भावे च भवन्तीति लकारविधायकसूत्रस्यार्थः। "द्वयेकयोर्द्विवचनैक"[8] वचने" "बहुषु बहुवचनम्"[9] इत्येताभ्यां सूत्राभ्यां सहैकवाक्यतया कर्तरि प्रत्ययस्थले कर्तृगत एकत्वद्वित्वबहुत्व विवक्षायां, कर्मणि प्रत्ययस्थले कर्मगत एकत्वद्वित्व बहुत्वविवक्षायां क्रमशः लादेशानामेकवचनद्विवचनबहुवचनानि विधीयन्ते। एवञ्च कर्तृकर्मभावसंख्या लकाराणां लादेशानां वाऽर्थः।

लडादीनां लकाराणां विधानन्तु 'वर्तमाने लट्'[10] इत्यादिसूत्रैः तत्तत्काल एव भवति। एवञ्च कालोऽपि तेषामर्थः। तत्र कर्तृकर्मसंख्याभावकालेषु भावस्य धातुवाच्यत्वात्"[11] कर्तृकर्मसंख्याकाला एव लकाराणामर्थाः सिद्ध्यन्ति वैयाकरणनिकाये। ननु वर्तमानादिषु लकारणां विधानात् तेषां कालरुपोऽर्थः कथं सम्भवतीति चेत्, उच्यते– भूतभविष्यवर्तमानश्चेति त्रयः कालस्य भेदाः वर्णिता आचार्यैः। तत्र यद्यपि काल एकैव विभुर्नित्यश्च, किन्तु तस्य क्रियोपाधिकृतं भेदत्रयमेव।

नागेशास्त्वेष्वर्थेषु लादेशानां तिङादीनां शक्तिं स्वीकुर्वन्ति। उक्तञ्च तैः तत्र[12] संख्याविशेषकालविशेषकारकविशेषभावा लादेशमात्रस्यार्थाः। अयमभिप्रायस्तेषां लोके लादेशानामेव प्रयोगो दृश्यते, न तु लकाराणाम्। एवञ्च 'उच्चार्यमाणः शब्दः[13] सम्प्रत्यायको भवति' इति भाष्योक्त्या लोके प्रयुक्तानामेव तिङादीनां वाचकत्वं युक्तमिति कृत्वा लादेशार्थविचार एव कृतस्तेन। एवञ्चास्मिन्मते यद्यपि "लः कर्मणि च भावे चाकर्मकेभ्यः" ''वर्तमाने लट्" इत्यादिसूत्राणां स्वारस्यमसंगतमेव प्रतिभाति, यतो हि उक्तसूत्रैः तत्तदर्थेषु लकाराणां विधानात्, लकाराणामेवतद्वाचकत्वं युक्तम्, न तु लादेशानामिति। इमामेवासंगतिं मनसि निधाय उक्तम्– "वर्तमाने लट्" इत्यादिविधायक 'लः कर्मणि' इति शक्तिग्राहकसूत्राणामादेशार्थ स्थानिन्यारोप्य प्रवृत्तिः[14]" "अयमाशयः यत् तिबादीनामर्थवाचकानां शास्त्रीयप्रक्रियानिर्वाहाय स्थानित्वेन कल्पितेषु लकारेषु आरोपं कृत्वा तथा सूत्राणि प्रणीतानि सूत्रकारेण न तु लकाराणां वस्तुतोऽर्थवाचकत्वमवधार्य इति। कौण्डभट्टास्तु लडादयाष्टितः[15] "षट्क्रमेणैष्वर्थेषु द्रष्टव्याः इत्यादिरूपेण वर्तमानादिष्वर्थेषु लडादीनां विधानं वर्णयन्ति। अतः तेषां मते लकाराणामेव वाचकत्वम्। अत एव लकारर्थ–निर्णय एव प्रस्तावितस्तैः।

### पाणिनिसम्मति

यदि लकाराणां कर्तरि कर्मणि च शक्तिर्न स्वीक्रियते, तर्हि तिबादीनामपि कर्तृकर्मवाचकत्वं न स्यात्, स्थान्यादेशयोः समानार्थकत्वनियमात्। अत एव 'तृज्वत् क्रोष्टुः'[16] शब्दस्य स्थाने 'क्रोष्ट्र' एव भवति, अर्थकृतसादृश्यात्, न तु होतृपोत्रादयः। एवञ्च लकारस्य कर्तृकर्माद्यवाचकत्वे तिबादीनामपि कर्तृकर्माद्यवाचकत्वात्, तिङ्वाच्यवाचकत्वरूप समानाधिकरणस्य युष्मद्यस्मदि चाभावेन पुरुषव्यवस्था न स्यात्। तस्मादुक्तरूपेण पुरुषव्यवस्थां प्रतिपादयता पाणिनिनाऽपि लकारणां कर्तरिकर्मणि च शक्तिः स्वीकृता एव।'

एवञ्च सामान्यतः लकारार्थं निरूप्य तत्तल्लकाराणां विशेषार्थो निरूप्यते। तत्र प्रथमोपस्थितत्वात् लट् लकारार्थी निरूप्यते।

### भूषणसारमतम्

कौण्डभट्टास्तु वर्तमानकालक्रियाविशिष्टवाचकात् धातोर्लट् भवतीत्यर्थकात् ''वर्तमाने लट्"[17] इत्यनुशासनात् वर्तमानकालो लडर्थ इति स्वीकुर्वन्ति। वर्तमानत्वञ्च तेषां मते प्रारब्धापरिसमाप्तत्वरूपं, भूतभविष्यद् भिन्नत्वं वा। तथा चोक्तम्– वर्तमानार्थे[18] लट् 'वर्तमाने लट्' इति सूत्रात्। वर्तमानकालस्य प्रयोगस्तत्रैव भवति, यत्र क्रिया प्रारब्धा। यत्र क्रियान्तरव्यवहितत्वेनोपरता सा, तत्र न वर्तमानकालत्वम्। अयं भावः– यत्र क्रियारम्भस्या समाप्तिर्नास्ति, तत्र वर्तमानकालः। 'देवदत्तो भुङ्क्ते' इत्यादावश्यरूपेण वर्तमानकालता स्वीक्रियते तत्रापि भोजनादिक्रियायां हसनजल्पनादि क्रियाव्यवधानं भवत्येव। अतः यथा तत्र वर्तमानत्वं स्वीक्रियते, तथैव प्रवृत्तेऽध्ययने ततो वितरेऽपिमध्ये भोजनादिनाव्यवाये तत्कालेऽधीते इत्यादौ वर्तमान कालत्वं स्वीकरणीयमिति भाष्याशयः।

### परमलघुमञ्जूषामतम्

तत्र वर्तमानत्वस्वरुपं प्रतिपादयता नागेशेनोक्तम्– "वर्तमानकालत्वञ्च प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम्[19]।" प्रारब्धा चापरिसमाप्ता च या क्रिया तादृशक्रियोपलक्षितः कालो वर्तमान काल इति भावः। नन्वेवं गतेऽह्नि कृतस्य पाकस्याभि प्रायेणाऽपि पचतीति प्रयोगापत्तिः। तत्तत्कालावच्छेदेन तत्कालस्यापि प्रारब्धापरिसमाप्त क्रियोपलक्षित्वादिति चेदुच्यते– प्रयोगविशिष्ट क्रियोपलक्षितत्वं वर्तमानत्वमिति परिष्कारस्वीकारेणादोषात्।

### लिट्लकारार्थ

"अनद्यतने भूते परीक्षे च विद्यमानक्रियावाचकात् धातोर्लिट् भवति' इत्यर्थकेन 'परोक्षेलिट्[20] इति सूत्रेण भूतानद्यतने परोक्षे च लिड्विधानात् अनद्यतनभूतकाल परोक्षत्वञ्च लिडर्थः। तथा चोक्तं नागेशेन "लिट् तिङस्तु"[21] भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः। " अनद्यतनभूत इत्यत्र अनद्यतन शब्दे बहुब्रीहिः समासः। न विद्यते अद्यतनो यस्मिन् सः अनद्यतनः। अद्यतनाद् भिन्नः कालोऽनद्यतन शब्देनोच्यते। तत्र अद्यतनः कः ? इति चेत् उच्यते भट्टोजिदीक्षितेन– अतिक्रान्तायाः रात्रेः उत्तरार्धः आगामिन्याश्च पूर्वार्धेन सहितो दिवसोऽद्यतनकालपदेन गृह्यते इति। अक्ष्णः परं परोक्षमिति व्युत्पत्त्या निष्पन्ने परोक्षशब्दे अक्षिशब्दः इन्द्रियमात्रस्यवाचकः न तू नेत्रमात्रस्य। तथा चोक्तं नागेशेन "वृत्तिविषये तु अक्षिशब्दः सर्वेन्द्रियवचने, न चक्षुः पर्यायः"[22]। "साक्षात्करोमीति ज्ञानाविषयत्वमेव परोक्षत्वमिति स्वीकृतं कौण्ड भट्टेन। कथितञ्च परोक्षत्वञ्च"[23] साक्षात्करोमि इति एतादृशविषयताशालिज्ञानाविषयत्वम्" इति।

### लुट्लकारार्थ

'अनद्यतने लुट्–'[24] इति पाणिन्यष्टाध्याय्यनुशासनात् अनद्यतन भविष्यत्वं लुट् लकारार्थः। अनद्यतने भाविनीत्यर्थः। कौण्डभट्टेन यत्, ''लुडादेशस्य"[25] च भविष्यदनद्यतनार्थोऽधिकः शेषं लृड्वत इति। तत्रानद्यतनम्, अद्यतनभिन्नत्वं इति पूर्वं प्रतिपादितम्। नागेशेन तु "भविष्यत्वं च वर्तमान प्रागभावप्रतियोगिक्रियोपलक्षितत्वम'[26] इति स्वीकृतं परमलघुमञ्जूषायाम्। 'परिदेवने श्वस्तनी भविष्यन्त्यर्थः[27] इति वार्तिकेन महाभाष्ये अनुशोचनेऽर्थे भविष्यत्सामान्येऽर्थे च लुडविधानं प्रतिपादितम्।

### लृट्लकारार्थ

सामान्यभविष्यदेव लृट् लकारार्थः। लृट् शेषे च[28] इति सूत्रेण सामान्यभविष्यत्काल एव लृड़ि् वधानात्। उक्तञ्च कौण्डभट्टेन– 'भविष्यत् सामान्य"[29] इत्यर्थः। नागेशेनापि अस्मिन्नेवार्थे स्वकीया सम्मति दत्ता। 'लृट् तिङस्तु भविष्यत्सामान्यमेवार्थः' इति।[30]

### लेट्लोडर्थविचार

'लिङर्थे लेट्' ''आशिषि लिङ्लोटै"[31] "लोट् च"[32] इति पाणिनि अष्टाध्याय्यानुसारेण लिङर्थे लेट्लोटोविधानेन लेट्लोट् लिङस्तु समानार्था एव। उक्तञ्च कौण्ड भट्टेन "एतयोरर्थो"[33] लिङर्थ एव त्रयाणां समानार्थत्वात्' इति। अतः मयाऽत्र लिङर्थ एव निरूप्यते।

### लिङर्थविचार

'विधिनिमन्त्रणामन्त्रणाधीष्ट सम्प्रश्नप्रार्थनेषु लिङ[34] इति पाणिनिसूत्रेण विध्यादिषु अर्थेषु लिड.विधानेन लोके प्रयोगाच्च विध्यादिरेव विशेषेण लिङर्थाः इति स्वीकुर्वन्ति। उक्तञ्च नागेशेन–लिङादेशस्य तु विध्यादिरर्थः[35] इति। तत्र विधिर्नाम प्रेषणम्, निमन्त्रणं नियोगकरणम्। आमन्त्रणञ्च स्वाभिलषिते कामचारेण प्रवर्त्यप्रवर्तनम्। निमन्त्रणामन्त्रणयोर्भेदं प्रतिपादयता पतञ्जलिना उक्तम्– आमन्त्रणे कामचारः[36]। आमन्त्रणं कामचारानुज्ञा इति प्रतिपादितं कौण्डभट्टेनापि। अधीष्टः सत्कारपूर्वको व्यापारः। सम्प्रश्नः सम्प्रधारणम्। प्रार्थना तु स्वाभिलषितदानप्रवर्तिकोक्तिः। कौण्डभट्टेन लिङर्थ विषये यत्स्वकीयं पक्षं कथितं तदेव पक्षः नागेशेनापि स्वीकृतः। यथा– प्रवर्तनात्वञ्च प्रवृत्तिजनकज्ञान विषयतावच्छेदकत्वं तच्च इष्टसाधनत्वस्यैव इति तदेव लिङर्थः।"[37]

### लङ्लकारार्थ

अनद्यतनभूतार्थवाचिनो धातोर्लङ् भवतीत्यर्थकात् 'अनद्यतने लङ्'[38] इति पाणिन्यनुशासनात् अनद्यतनभूत्वमेव लङ्लकारार्थः। उक्तञ्च 'अनद्यतन भूत'[39] इत्यर्थः, अनद्यतने लङ् इति सूत्रात्। तत्रानद्यतनम्–अद्यतनभिन्नमेव पूर्ववत्। 'भूतत्वञ्च'[40]

वर्तमानध्वंसप्रतियोगिक्रियोपलक्षितत्वमिति व्याख्यातं नागेशेन। तथा चोक्तं पतञ्जलिना– 'एष च नाम न्याय्यो भूतकालः[41] यत्र किञ्चिदप्रवृत्तं दृश्यते' इति। एवञ्च लङर्थोऽनद्यतन भूतकाल एव।

**लुङ्लकारार्थ**

'लुङ्'[42] इति पाणिनि सूत्रानुसारेण भूतसामान्यमेव लुङ्लकारार्थः। उक्तञ्च नागेशेनाऽपि लुङादेशस्य तु भूतसामान्यमर्थः[43]। तत्र लङ्वाच्यो भूतोऽनद्यतनरूपः, लुङ्वाच्यस्तु सामान्यभूतः इति विशेषः। एवञ्चात्र सामान्यविशेषयोः ऐक्यात् कदाचित् भूतविशेषेऽपि भूतत्वमात्रविवक्षायां लुङ् भवति।

**लृङ्लकारार्थ**

'लिङ्निमित्ते लृङक्रियातिपत्तौ[44] इति पाणिनिसूत्रात् क्रियाया असिद्धौ हेतुहेतुमद्भावे च भूतं भविष्यत्वञ्च लृङ्लकारार्थः, लिङ्निमित्ते, क्रियातिपत्तौ च लृड्विधानात"[45]। तत्र भट्टोजिदीक्षितेन उक्तं यत् – 'हेतुहेतुमद्भावादि लिङ्निमित्तम'। नागेशेनाऽपि उक्तम्–[46] 'लृङादेशस्य तु क्रियातिपत्तौ गम्यमानायां हेतुहेतुमद्भावे च गम्यमाने भूतं भविष्यत्वञ्च अर्थ इति'

**लङि लङ्लुङ्लृङिति चतुर्णां ङितां लकाराणामर्थं प्रतिपादयन् कथयति कौण्डभट्ट**

> ह्यो भूते प्रेरणादौ[47] च भूतमात्रेलङादयः।
> सत्यां क्रियातिपत्तौ च भूतेभाविनि लृङस्मृतः।।'

एवञ्च कालः, कर्ता, कर्म, संख्येति चतुर्विधेषु लकारार्थेषु कर्त्राद्यर्थे सर्वेषामेव साम्यम्, किन्तु कालविशेषे भेदो दृश्यते। यद्यपि काल एक एव, किन्तु व्यवहारदृष्ट्या तत्र भेदः कल्प्यते।

**उपसंहार**

एवं प्रकारेण लकारार्थस्य प्रतिपाद्याविषयं संक्षिपन् आह कौण्डभट्ट :– कालो द्विविधः, अद्यतनोऽनद्यतनश्च। अद्यतनस्त्रिविधः, भूतभविष्यद्वर्तमानभेदात्। अनद्यतनः द्विविधः भूतो भविष्यञ्च। तत्र वर्तमाने लट्, भूतमात्रे लुङ, भविष्यमात्रे च लृट्। हेतुहेतुमद्भावाद्यधिकार्थविवक्षायाम् अनयोः **लृङ** अनद्यतने भूतत्वेन विवक्षिते लङ्। तत्रैव परोक्षत्वविवक्षायां लिट्, तादृशे भविष्यति लुट्। अन्ते च लादेशानामेव वाचकता इति पक्षः श्रीनागेशस्य, लकाराणां लत्वेन वाचकता इति पक्षः भूषणसारकारस्य श्रीकौण्डभट्टस्य इति स्वीकृतम'।

**इति**

1. पाणिनीय शिक्षा – 41
2. पाणिनीय शिक्षा–42
3. महाभाष्यम् (पस्पशाह्निकम)
4. काव्यादर्श– इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्देह्वयं ज्यातिरासंसारं न दीप्यते'
5. महाभाष्यम् (पस्पशाह्निकम)
6. पा. सू. अष्टाध्यायी 3/4/69
7. पा. सू. अष्टाध्यायी–3/4/67
8. पा. सू अष्टाध्यायी–1/4/22
9. पा. सू. अष्टाध्यायी–1/4/21
10. पा. स. अष्टाध्यायी–3/2/123
11. वाक्यपदीयम्– भाव एव हि धात्वर्थ इत्यवच्छिन्न आगमः'
12. परमलघुमञ्जूषालादेशार्थ विचारः
13. महाभाष्यम्– 1/1/69
14. परमलघुमञ्जूषा लादेशार्थविचारः
15. वै. भूषणसार 'कारिका–22'
16. पा. सू. अष्टाध्यायी– 7/1/95
17. पा. सू. अष्टाध्यायी–3/2/123
18. वै. भूषणसारः लकारार्थनिर्णयः
19. परमलघुमञ्जूषा लादेशार्थविचारः
20. पा. सू. अष्टाध्यायी– 3/2/115
21. परमलघुमञ्जूषा–लादेशार्थविचारः
22. महाभाष्योद्योतः 3/2/115
23. वै. भूषणसारः लकारार्थनिर्णयः
24. पा. सू. अष्टाध्यायी–3/3/15–
25. वै. भूषणसारः लकारार्थनिर्णयः
26. परमलघुमञ्जूषा–लादेशार्थवचारः
27. महाभाष्यवार्तिकम् – 3/3/15
28. पा. सू. अष्टाध्यायी– 3/3/13
29. वै. भूषणसारः लकारार्थनिर्णयः
30. परमलघुमञ्जूषा–लादेशार्थविचारः
31. पा. सू. अष्टाध्यायी–3/3/173
32. पा. सू. अष्टाध्यायी–3/3/162
33. वै. भूषणसारः लकारार्थनिर्णयः
34. पा. सू. अष्टाध्यायी–3/3/161
35. परमलघुमञ्जूषा–लादेशार्थविचारः
36. महाभाष्यम्–3/3/161
37. परमलघुमञ्जूषा–लादेशार्थ विचारः
38. पा. सू. अष्टाध्यायी–3/2/111
39. वै. भूषणसारः लकारार्थनिर्णयः
40. परमलघुमञ्जूषा –लादेशार्थविचार
41. महाभाष्यम्–3/1/102
42. पा. सू. अष्टाध्यायी–3/2/110
43. परमलघुमञ्जूषा लात्रदेशार्थविचारः
44. पा. सू. अष्टाध्यायी–3/3/139
45. वैयाकरण सिद्धान्तकौमुदी
46. परमलघुमञ्जूषा–लादेशार्थविचारः
47. वैयाकरण भूषणसारः (कारिका–23)

**सन्दर्भ**


1. महाभाष्यम् (पस्पशाह्निकम), शेषावतारः पतञ्जलि
2. काव्यादर्शः, श्री दण्डी
3. वैयाकरण सिद्धान्त कौमुदी, भट्टोजी दीक्षितः
4. महाभाष्यम्, शेषावतारः पतञ्जलिः
5. महाभाष्यम्, शेषावतारः पतञ्जलिः
6. वाक्यपदीयम्, श्री भर्तृहरिः
7. महाभाष्यम्, शेषावतारः पतञ्जलिः
8. अष्टाध्यायी, महर्षिः पाणिनिः
9. अष्टाध्यायी, महर्षिः पाणिनिः
10. अष्टाध्यायी, महर्षिः पाणिनिः
11. वाक्यपदीयम्, श्री भर्तृहरिः
12. वाक्यपदीयम, श्री भर्तृहरिः
13. अष्टाध्यायी, महर्षिः पाणिनिः